# ROLL DESCRIPTIONS

| | | | |
|---|---|---|---|
| ROLL NO. WITH CENTRE CODE | 001 0376 | DATE OF FILMING | 19-01-91 |

NAME OF THE CENTRE/COLLECTION: Saraswati Bhawan Library, Varanasi

DETAILS OF CATALOGUE (SUB/VOL.): Veda

| | | | |
|---|---|---|---|
| LANGUAGE | Sanskrit | SCRIPT | Bengali, Devanagari, |
| MATERIAL | Paper | TOTAL FRAMES | 602 |
| ORIGINAL FILM USED | Kodak | FOOTAGE | |

## RETAKES INFORMATION

| MSS. NO. | FOLIO NO. | REMARKS |
|---|---|---|
| 004908 | 2 Frames | Spliced at End. |

Indira Gandhi National Centre for the Arts

सं० ३४५८३  विषय: वेद:  क्रम सं० ६६५

कैवल्योपनिषत् ।  ग्रन्थकार

०१-८

सं०  अक्षर सं० (पंक्तौ) २५  पंक्ति सं० (पृष्ठे) ८

७.३" x ३.८"  लिपि: देवनागरी  आधार: कागज.

परिणाम

004911  १०/७७

एस० यू० पी०—७९ एस० सी० ई०—१९५१—५०,०००

Indira Gandhi National Centre

श्रीगणेशाय नमः ॥ ॥ हरिः ॐ ॥ सहनाववतु ॥० तिः ॥ भ
द्रंकर्णेभिः० ॥ ॐ शांतिः शांतिः शांतिः ॥ हरिः ० ॥ अथाश्वलाय
नो भगवंतं परमेष्ठिनं परिसमेत्योवाच ॥ अधीहि भगवन्ब्र
ह्मविद्यां वरिष्ठां ॥ सदा सद्भिः सेव्यमानान्निगूढां ॥ ययाचि
रात्सर्वपापं व्यपोह्य ॥ परात्परं पुरुषमुपैति विद्वान् ॥ तस्मै
स होवाच ॥ पितामहश्च ॥ श्रद्धाभक्तिध्यानयोगादवैहि ॥
न कर्मणा न प्रजया धनेन त्यागेनके अमृतत्वमानशुः ॥ प
रेण नाकं निहितं गुहायां विभ्राजदेतद्यतयो विशांति ॥ वेदांत

Indira Gandhi National Centre for the Arts

विज्ञानसुनिश्चितार्थाः सन्यासयोगाद्यतयः शुद्धसत्वाः॥
१ तेब्रह्मलोकेतु परांतकाले परामृतात्परिमुच्यंति सर्वे॥
विविक्तदेशे च सुखासनस्थः शुचिः समग्रीवशिरःश
रीरः॥ अत्याश्रमस्थः सकलेंद्रियाणि निरुध्य भक्त्या स्व
गुरुं प्रणम्य॥ हृत्पुंडरीकं विरजं विशुद्धं विचिंत्य मध्ये
विशदं विशोकं॥ अचिंत्यमव्यक्तमनंतरूपं शिवं प्रशांत १
ममृतं ब्रह्मयोनिं॥ तदादिमध्यांतविहीनमेकं विभुं चिदा
नंदमरूपमद्भुतं॥ उमासहायं परमेश्वरं प्रभुं त्रिलोचनंनी

लकंठं प्रशांतं॥ ध्यात्वा मुनिर्गच्छति भूतयोनिं समस्तसाक्षिं
तमसः परस्तात्॥ स ब्रह्मा स शिवः स हरिः सेंद्रः सोक्षरः
परमः स्वराट्॥ स एव विष्णुः स प्राणः स कालोग्निः स चंद्र
माः॥ स एव सर्वं यद्भूतं यच्च भव्यं सनातनं॥ ज्ञात्वा तं
मृत्युमत्येति नान्यः पंथा विमुक्तये॥ सर्वभूतस्थमात्मानं
सर्वभूतानि चात्मनि॥ संपश्यन्ब्रह्म परमं याति नान्येन
हेतुना॥ आत्मानमरणिं कृत्वा प्रणवं चोत्तरारणिं॥ ध्या
ननिर्मथनाभ्यासात्पाशं दहति पंडितः॥ स एव मायापरि

Indira Gandhi National Centre for the Arts

मोहितात्मा शरीरमास्थाय करोति सर्वं॥ स्त्र्यन्नपानादि
विचित्रभोगैः स एव जाग्रत्परितृप्तिमेति॥ स्वप्ने तु जीवः
सुखदुःखभोक्ता स्वमायया कल्पितविश्वलोके॥ सुषु
प्तिकाले सकले विलीने तमोभिभूतः सुखरूपमेति॥
पुनश्च जन्मांतरकर्मयोगात्स एव जीवः स्वपिति प्रबु
द्धः॥ पुरत्रये क्रीडति यस्तु जीवस्ततस्तु जातं सकलं वि
चित्रं॥ आधारमानंदमखंडबोधं यस्मिंलयं याति पु
रत्रयं च॥ यत्रैनतेजां शिमनांसियत्रमत्तोंत्यभावविरहे

३ × सूक्ष्मात्सूक्ष्मतरं नित्यं तत्त्वमेव त्वमेव तत्॥
णुयोगिनां॥ एतस्माज्जायते प्राणो मनः सर्वेंद्रियाणि
च॥ खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी॥ यत्परं
ब्रह्म सर्वात्मा विश्वस्यायतनं महत्॥ जाग्रत्स्वप्नसुषु
प्त्यादिप्रपंचं यत्प्रकाशते॥ तद्ब्रह्माहमिति ज्ञात्वा स
र्वबंधैः प्रमुच्यते॥ त्रिषु धामसु यद्भोग्यं भोक्ता भोगश्च
यद्भवेत्॥ तेभ्यो विलक्षणः साक्षी चिन्मात्रोहं सदाशि
वः॥ मय्येव सकलं जातं मयि सर्वं प्रतिष्ठितं॥ मयि स
र्वं लयं याति तद्ब्रह्माद्वयमस्म्यहं॥ अणोरणीयान्

Indira Gandhi National Centre for the Arts

के·नि

हमेवतद्व्न्महानहंविश्वमिदंविचित्रं॥पुरातनोहंपुरु
३ षोहमीशोहिरण्मयोहंशिवरूपमस्मि॥अपाण्यपा
दोहमचिंत्यशक्तिः पश्याम्यचक्षुःसशृणोम्यकर्णः॥
अहंविजानामिविविक्तरूपं नचास्तिवेत्ताममचित्सदा
हं॥वेदैरनेकैरहमेववेद्यो वेदांतकृद्वेदविदेवचाहं॥
नपुण्यपापेममनास्तिनाशोनजन्मदेहेंद्रियबुद्धिर
स्ति॥नभूमिरापोममवह्निरस्ति नचानिलोमेस्तिनचां ३
बरंच॥एवंविदित्वापरमात्मरूपंगुहाशयंनिष्कलम

द्वितीयं॥समस्तसाक्षिंसदसद्विहीनंप्रयातिशुद्धंपरमात्म
रूपं॥यःशतरुद्रमधीयते॥सोग्निपूतोभवति॥स्वर्णस्तेया
त्पूतोभवति॥गुरुतल्पात्पूतोभवति॥सुरापानात्पूतोभ
वति॥ब्रह्महत्यात्पूतोभवति॥कृतकृत्यात्पूतोभवति॥
अभक्ष्यभक्षणात्पूतोभवति॥अभोज्यभोज्यात्पूतोभव
ति॥अगम्यगमनात्पूतोभवति॥तस्मादविमुक्तमाश्रितो
भवत्यत्याश्रमीसर्वदासकृद्वाजपेत्॥अनेनज्ञानमा
प्नोति॥संसारार्णवनाशनं॥तस्मादेवंविदित्वैनंकैव

Indira Gandhi National
Centre for the Arts

के॰ नि॰
४

यं फलमश्नुते केवल्यं फलमश्नुत इति ॥ ४ ॥ हरिओंम् ॥
तत्स केवल्योपनिषत्समाप्तः ॥ छ ॥ ॥ श्रीपाद श्री वल्लभ
दत्तात्रयार्पणमस्तु ॥ वामनाश्रमया चैतत्स सत्यत्रिवाचा ॥
ओंम् ॥ भद्रं कर्णेभिः० तिः ॥ ॥ ओम् नमो ब्रह्मवादि
भ्यो ब्रह्मविद्यासंप्रदायकर्तृभ्यो वंशऋषिभ्यो नमो
गुरुभ्यः ॥ १ ॥ सर्वोपप्लवरहितः प्रज्ञानघनः प्रत्य
गर्थो ब्रह्मैवाहमस्मि ॥ ॐ ॥ तत्सत् ॥ सहनाववतु ॥ ० ४

Indira Gandhi National
Centre for the Arts